"अमार्कपातश्रवणैर्युक्ता चेन्माघपौषयोः।
अर्द्धोदयः स विज्ञेयः कोटिसूर्य्यग्रहैः समः॥
अत्र सूर्य्यपर्व्वशताधिक इति कृत्यचिन्तामणौ पाठः। तथा।
"दिवैव योगः शस्तोऽयं न च रात्रौ कदाचन।"
स्कन्दपुराणे।
"अर्द्धोदये तु संप्राप्ते सर्व्वं गङ्गासमं जलं।
शुद्धात्मानो द्विजाः सर्व्वे भवेयुर्ब्रह्मसन्निभाः॥
यत्किञ्चित् क्रियते दानं तद्दानं मेरुसन्निभं"॥
शिवविश्वास्नानप्रशस्तकालोऽपि। वृहन्नारदीये।
"अर्द्धोदये च पूष्यार्के हस्तार्के रोहिणीबुधे"।
इति तिथ्यादितत्त्वं॥

अर्द्धोरुकं, क्ली, (अर्द्धमूरोः अर्द्धोरु, तत्र काय़ते, कै+ड।) उत्तमस्त्रीणां अर्द्धोरुपर्य्यन्तं चोलनाकारपरिधेयवस्त्रं। तत्पर्य्यायः। चण्डातकं २। इत्यमरः॥

अर्पणं, क्ली, (ऋ+णिच्+ल्युट्।) प्रापणं। समर्पणं। यथा,—
"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणं"॥
इति श्रीभगवद्गीतायां ९ अध्यायः। (स्थापनं। न्यासः।
"कैलासगौरं वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम्"।
इति रघुवंशे। स्वत्वत्यागः। परित्यागः।
"अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये"।
इति साहित्यदर्पणे।)

अर्पिसः, पुं, (ऋ+णिच्+इसन्।) हृदयं। इत्युणादिकोषः॥ (अग्रमांसः।)

अर्ब्ब, हिंसे। (भ्वादि-परं-सकं-सेट्।) गतौ। इति कविकल्पद्रुमः। अर्ब्बति। इति दुर्गादासः॥

अर्ब्बुदः, पुं, क्ली, (अर्ब्ब+विच्, तस्मै उदेति, उद+इण+ड।) दशकोटिसंख्या। रोगविशेषः। मांसकीलः। मांसपुरुषः। आव् इति भाषा। इति लिङ्गादिसंग्रहे अमरो मेदिनी च॥ तस्य निदानलक्षणे।
"गात्रप्रदेशे क्वचिदेव दोषाः
संमूर्च्छिता मांसमसृक् प्रदूष्य।
वृत्तं स्थिरं मन्दरुजं महान्त-
मनल्पमूलं चिरवृद्ध्यपाकं॥
कुर्व्वन्ति मांसोच्छ्रयमत्यगाधं
तदर्ब्बुदं शास्त्रविदो वदन्ति"।
महान्तं ग्रन्थ्यपेक्षया चिरेण वृद्धिरपाकश्च यस्य तत् चिरवृद्ध्यपाकं। अपाकमिति ग्रन्थेः सकाशादस्य भेदज्ञापकं। अत्यगाधं दूरानुप्रविष्टं॥*॥ निदानपूर्व्वकाणि विशिष्टानि लक्षणान्याह।
"वातेन पित्तेन कफेन वापि
रक्तेन मांसेन च मेदसा च।
तज्जायते तस्य च लक्षणानि
ग्रन्थेः समानानि सदा भवन्ति"॥
ग्रन्थेः समानानि वातिकपैत्तिकश्लैष्मिकमेदोजानां ग्रन्थीनां लक्षणैर्व्वातिकपैत्तिकश्लैष्मिकमेदोजाना-
मर्ब्बुदानां लक्षणानि तुल्यानि भवन्ति॥*॥ रक्तार्ब्बुदमाह।
"दोषप्रदुष्टं रुधिरं शिराश्च
सङ्कोच्य संपीड्य ततस्त्वपाकं।
सस्रावमुन्नह्यति मांसपिण्डं
मांसाङ्कुरैराचितमाशु वृद्धिं॥
स्रवत्यजस्रं रुधिरं प्रदुष्ट-
मसाध्यमेतद्रुधिरात्मकन्तु।
रक्तक्षयोपद्रवपीड़ितत्वात्
पाण्डुर्भवेदर्ब्बुदपीड़ितस्तु"॥
दोषोऽत्र पित्तं रुधिरं शिराश्च सङ्कोच्य संपीड्य संहतीकृत्य मांसाङ्कुरैः सर्व्वेष्वर्ब्बुदेषु दूष्यत्वं रक्तजे तु विशेषतो रक्तदुष्टिः। एवं मांसार्ब्बुदे विशेषतो मांसदुष्टिर्बोद्धव्या। ततो मांसपिण्डमुन्नह्यति उद्गतं करोति। अपाकं ईषत्पाकं यथा स्यादेवमिति क्रियाविशेषणं ईषत्पाकस्य एकदेशपाकेन। रक्तक्षयोपद्रवपीड़ितत्वात्। रक्तक्षयोपद्रवाः सुश्रुतेनोक्ताः। तैः पीड़ितत्वात्। अर्ब्बुदपीड़ितः रक्तार्ब्बुदपीड़ितः॥*॥ मांसार्ब्बुदस्य संप्राप्तिमाह
"मुष्टिप्रहारादिभिरर्दितेऽङ्गे
मांसं प्रदुष्टं समुपैति शोथं।
अवेदनं स्निग्धमनन्यवर्ण-
मपाकमश्मोपममप्रचाल्यं"॥
मांसं प्रदुष्टं वातेन। अवेदनं वेदनारहितं ईषद्वेदनं वा। अपाकं पाकरहितं ईषत्पाकं वा। अश्मोपमं पाषाणवत् कठिनं। अप्रचाल्यं स्थिरं। यद्यपि रक्तमांसार्ब्बुदयो रक्तमांसयोर्हेतुत्वेनोक्तिः तथापि रक्तजे पित्तं मांसजे वायुरारम्भकः॥*॥ निदानमाह।
"प्रदुष्टमांसस्य नरस्य गाढ़-
मेतद्भवेन्मांसपरायणस्य"।
मांसाशनाभ्यासेन यः प्रदुष्टमांसस्तस्यैव भवति इत्यर्थः॥*॥ असाध्यमाह।
"मांसार्ब्बुदं त्विदसाध्यमाहुः
साध्येष्वपीमानि विवर्जयेच्च।
संप्रस्रुतं मर्म्मसु यच्च जातं
स्रोतःसु वा यच्च भवेदचाल्यं"॥
साध्येष्वपि वातजादिष्वपि। इमानि वक्ष्यमाणानि संप्रस्रुतादीनि॥*॥ अपरासाध्यमाह।
"यज्जायतेऽन्यत् खलु पूर्व्वजाते
ज्ञेयं तदध्यर्ब्बुदमर्ब्बुदज्ञैः॥
यद्द्वन्द्वजातं युगपत् क्रमाद्वा
द्विरर्ब्बुदं तच्च भवेदसाध्यं"॥*॥
अर्ब्बुदानां पाकाभावे हेतुमाह।
"न पाकमायाति कफाधिकत्वा-
न्मेदोबहुत्वाच्च विशेषतस्तु।
दोषस्थिरत्वात् ग्रथनाच्च तेषां
सर्व्वार्ब्बुदान्येव निसर्गतस्तु"।
ग्रथनात् ग्रन्थिरूपत्वात्। ननु पञ्चमेदसोराधिक्येऽपि पाको दृश्यते तथाच कथं न पाक इत्याह निसर्गात् स्वभावात्॥*॥ अथार्ब्बुदस्य चिकित्सा।
"ग्रन्थ्यर्ब्बुदानां न यतो विशेषः
प्रदोषहेत्वाकृतिदोषदुष्टेः।
अतश्चिकित्सेद्भिषगर्ब्बुदानि
विधानविद्ग्रन्थिचिकित्सितेन॥
हरिद्रा-लोध्र-पत्तङ्ग-गृहधूम-मनःशिला।
मधुप्रगाढ़ो लेपोऽयं मेदोऽर्ब्बुदहरः परः॥१॥
मूलकस्य कृतः क्षारो हरिद्रायास्तथैव च।
शङ्खचूर्णेन संयुक्तो लेपः सिद्धोऽर्ब्बुदापहः॥२॥
वटदुग्धकुष्ठलोमकलिप्तं बद्धं वटस्य पत्रेण। अथ-
स्विसप्तरात्रात् महदप्युपशान्तिमर्ब्बुदं गच्छेत्॥३॥
शिग्रुमूलकयोर्व्वीजं रक्षोघ्नं सुरसां यवं।
तक्रेणाश्वरिपुं पिष्ट्वा लिम्पेदर्ब्बुदशान्तये॥४॥
रक्षोघ्नं सर्षपं। सुरसां तुलसीं। यवं इन्द्रयवं। अश्वरिपुं करवीरं। इत्यर्ब्बुदाधिकारः। इति भावप्रकाशः॥

अर्ब्बुद, पुं, (अर्ब्ब+उदच्।) पर्व्वतविशेषः। इति मेदिनी॥

अर्भः, पुं, (ऋ+भ।) बालकः। इति हेमचन्द्रः॥ (प्रभाहीनः। मलिनः। शिष्यः। छात्रः। शिशिरः। शाकशस्यादिकं।)

अर्भकः, पुं, (अर्भ एव, स्वार्थे कन्।) शिशुः। इत्यमरः॥
("अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः"।
इति रघुवंशे।) मूर्खः। कृशः। इति मेदिनी॥ स्वल्पः। सदृशः। इत्युणादिकोषः॥

अर्म्मं, क्ली, पुं, (ऋ+मन्।) चक्षूरोगविशेषः। इति लिङ्गादिसंग्रहे अमरः॥ तत्र पञ्चविधं। प्रस्तार्य्यर्म्म १ शुक्लार्म्म २ रक्तार्म्म ३ मांसार्म्म ४ स्नाय्वर्म्म ५। एषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि। वैद्यके नान्तक्लीवलिङ्गोऽयं शब्दः॥

अर्म्मणः, पुं, (ऋ+बाहुलकात् नन्।) द्रोणपरिमाणं। इति वैद्यकपरिभाषा॥

अर्य्यः, पुं, (ऋ+यत्।) स्वामी। वैश्यः। इत्यमरः॥ श्रेष्ठे त्रि। इति तट्टीकायां भरतः॥ (त्रि, उत्कृष्टः। न्याय्यः। प्रभुः।

अर्य्यमा, [न्] पुं, (अर्य्यं श्रेष्ठं मिमीते, मा+कनिन्।) सूर्य्यः।
("प्रोषितार्य्यमणं मेरोरन्धकारस्तटीमिव"।
इति माघः।
"सूर्य्योऽर्य्यमा भगस्त्वष्टा पूषार्कः सविता रविः।
गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः"॥
इति महाभारते। कश्यपात् दक्षकन्यया दित्या जातो द्वादशादित्यमध्ये परिगणितः ख्यात आदित्यः, यदुक्तं हरिवंशे,—
"मारीचात् कश्यपाज्जातास्ते दित्या दक्षकन्यया।
तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेव ह॥
अर्य्यमा चैव धाता च त्वष्टा पूषा च भारत!॥
विवस्वान् सविता चैव मित्रो वरुण एव च।
अंशो भगश्चातितेजा आदित्या द्वादश स्मृताः"॥)
अर्कवृक्षः। इत्यमरः॥ पितृदेवविशेषः। इति मेदिनी॥